अथ श्रीसप्तश्लेकीदुर्गास्तोत्रम्

श्रीगुरुभ्यो नमः

अस्य श्रीदुर्गासप्तश्लेकीस्तोत्रमन्त्रस्य

नारायण ऋषिः अनुष्टुप् छन्दः

श्रीमहाकाळी-महालक्ष्मी-महासरस्वत्यो देवताः

श्रीदुर्गाप्रीत्यर्थं सप्तश्लेकी-दुर्गापाठे विनियोगः ।

ज्ञानिनामपि चेतांसि देवी भगवती हि सा

बलादाकृष्य मोहाय महामाया प्रयच्छति १

दुर्गे स्मृता हरसि भीतिमशेष-जन्तोः

स्वस्थैः स्मृता मतिमतीव शुभं ददासि

दारिद्र्य दुःखभयहारिणि का त्वदन्या

सर्वोपकारकरणाय सदार्द्र-चित्ता २

सर्वमंगळमाङ्गळ्ये शिवे सर्वार्थसाधिके

शरण्ये त्र्यंबके देवि नारायणि नमोस्तु ते ३

शरणागत-दीनार्त-परित्राण-परायणे

सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते ४

सर्वस्वरूपे सर्वेशे सर्वशक्ति-समन्विते

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ५

रोगानशेषानपहंसि तुष्टा

रुष्टा तु कामान् सकलानभीष्टान्

त्वामाश्रितानां न विपन्नराणां

त्वामाश्रिता ह्याश्रयतां प्रयांति ६

सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि

एवमेव त्वया कार्यमस्मद्वैरि विनाशनम् ७

इति श्रीसप्तश्लोकी-दुर्गा सम्पूर्णा

श्रीकृष्णार्पणमस्तु